# RibhugItA from Gurujnanavasishtha

# ઋભુગીતા ગુરુજ્ઞાનવાસિષ્ઠે

## Document Information

Text title : ribhugItA from Gurujnanavasishtha

File name : ribhugita.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : D.V.N.Sarma dvnsarma at gmail.com

Proofread by : D.V.N.Sarma, PSA Easwaran

Description-comments : a book in Telugu Script published by V.Ramaswami Sastrulu : Sons, Madras.

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 30, 2022

*sanskritdocuments.org*

# ઋભુગીતા ગુરુજ્ઞાનવાસિષ્ઠે

## પ્રથમોઽધ્યાયઃ

શ્રી ગુરુમૂર્તિઃ ।
પુનર્જ્ઞાનં પ્રવક્ષ્યામિ યથાવત્પદ્મસમ્ભવ ।
યેનૈવ સર્વે મુચ્યન્તે જનાસ્સંસારબન્ધનાત્ ॥ ૧.૦૧॥

વિધે પુરા નિદાઘાખ્યો મુનિઃ પપ્રચ્છ સદ્ગુરુમ્ ।
ઋભુસંજ્ઞં મહાપ્રાજ્ઞં તદ્વદામિ તવાધુના ॥ ૧.૦૨॥

નિદાઘઃ ।
આત્માનાત્મવિવેકં મે કૃપયા બ્રૂહિ સદ્ગુરો ।
યેન સંસારપાથોધિં તરિષ્યામિ સુખેન વૈ ॥ ૧.૦૩॥

ઋભુરેવં તદા પૃષ્ટ ઉવાચ સકલાર્થવિત્ ।
સર્વવેદાન્તસારજ્ઞસ્સર્વપૂજ્યો મહત્તમઃ ॥ ૧.૦૪॥

ઋભુઃ ।
સર્વવાચોઽવધિર્બ્રહ્મ સર્વચિન્તાઽવધિર્ગુરુઃ ।
સર્વકારણકાર્યાત્મા કાર્યકારણવર્જિતઃ ॥ ૧.૦૫॥

સર્વસઙ્કલ્પરહિતસ્સર્વનાદમયશ્શિવઃ ।
સર્વવર્જિતચિન્માત્રસ્સર્વાનન્દમયઃ પરઃ ॥ ૧.૦૬॥

સર્વતેજઃ પ્રકાશાત્મા નાદાનન્દમયાત્મકઃ ।
સર્વાનુભવનિર્મુક્તઃ સર્વધ્યાનવિવર્જિતઃ ॥ ૧.૦૭॥

સર્વનાદકલાતીત એષ આત્માઽહમવ્યયઃ ।
આત્માનાત્મવિવેકાદિ ભેદાભેદવિવર્જિતઃ ॥ ૧.૦૮॥

શાન્તાશાન્તાદિહીનાત્મા નાદાન્તર્જ્યોતિરાત્મકઃ ।
મહાવાક્યાર્થતો દૂરો બ્રહ્માસ્મીત્યતિદૂરગઃ ॥ ૧.૦૯॥

તચ્છબ્દવર્જ્યસ્ત્વં શબ્દહીનો વાક્યાર્થવર્જિતઃ ।
ક્ષરાક્ષરવિહીનો યો નાદાન્તર્જ્યોતિરેવ સઃ ॥ ૧.૧૦॥

અખણ્ડૈકરસો વાઽહમાનન્દોઽસ્મીતિ વર્જિતઃ ।
સર્વાતીતસ્વભાવાત્મા નાદાન્તર્જ્યોતિરેવ સઃ ॥ ૧.૧૧॥

આત્મેતિ શબ્દહીનો ય આત્મશબ્દાર્થવર્જિતઃ ।
સચ્ચિદાનન્દહીનો ય એષૈવાત્મા સનાતનઃ ॥ ૧.૧૨॥

ન નિર્દેષ્ટું ચ શક્યો યો વેદવાક્યૈરગમ્યકઃ ।
યસ્ય કિઞ્ચિદ્બહિર્નાસ્તિ કિઞ્ચિદન્તઃ કિયન્ન ચ ॥ ૧.૧૩॥

યસ્ય લિઙ્ગં પ્રપઞ્ચં વા બ્રહ્મૈવાત્મા ન સંશયઃ ।
નાસ્તિ યસ્ય શરીરં વા જીવો વા ભૂતભૌતિકઃ ॥ ૧.૧૪॥

નામરૂપાઽદિકં નાસ્તિ ભોજ્યં વા ભોગભુક્ચ વા ।
સદ્વાઽસદ્વા સ્થિતિર્વાઽપિ યસ્ય નાસ્તિ ક્ષરાક્ષરમ્ ॥ ૧.૧૫॥

ગુણં વા વિગુણં વાઽપિ સમ આસીન્ન સંશયઃ ।
યસ્ય વાચ્યં વાચકં વા શ્રવણં મનનં ચ વા ॥ ૧.૧૬॥

ગુરુશિષ્યાઽદિ ભેદં વા દેવલોકાસ્સુરાસુરાઃ ।
યત્ર ધર્મમધર્મં વા શુદ્ધં વાઽશુદ્ધમણ્વપિ ॥ ૧.૧૭॥

યત્ર કાલમકાલં વા નિશ્ચયં સંશયં ન હિ ।
યત્ર મન્ત્રમમન્ત્રં વા વિદ્યાઽવિદ્યે ન વિદ્યતે ॥ ૧.૧૮॥

દ્રષ્ટૃદર્શનદૃશ્યં વા ઈષન્માત્રં કલાદિકમ્ ।
અનાત્મેતિ પ્રસઙ્ગો વા હ્યનાત્મેતિ મનોઽપિ વા ॥ ૧.૧૯॥

અનાત્મેતિ જગદ્વાઽપિ નાસ્તિ નાસ્તીતિ નિશ્ચિનુ ।
સર્વસઙ્કલ્પશૂન્યત્વાત્ સર્વકાર્યવિવર્જનાત્ ॥ ૧.૨૦॥

કેવલં બ્રહ્મમાત્રત્વાત્ નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ।
દેહત્રયવિહીનત્વાત્ કાલત્રયવિવર્જનાત્ ॥ ૧.૨૧॥

લોકત્રયવિહીનત્વાત્ સર્વમાત્મેતિ શાસનાત્ ।
ચિત્તાભાવાન્ન ચિન્તાસ્તિ દેહાભાવાજ્જરા ન ચ ॥ ૧.૨૨॥

પાદાભાવાદ્ગતિર્નાસ્તિ હસ્તાભાવાત્ ક્રિયા ન ચ ।
મૃત્યુર્નાસ્તિ જરાઽભાવાત્ બુદ્ધ્યભાવાત્ સુખાદિકમ્ ॥ ૧.૨૩॥

ધર્મો નાસ્તિ શુચિર્નાસ્તિ સત્યં નાસ્તિ ભયં ન ચ ।
અક્ષરોચ્ચારણં નાસ્તિ ગુરુશિષ્યાદિ નાસ્ત્યપિ ॥ ૧.૨૪॥

એકાભાવે દ્વિતીયં ન ન દ્વિતીયે ન ચૈકતા ।
સત્યત્વમસ્તિ ચેત્ કિઞ્ચિદસત્યં ન ચ સમ્ભવેત્ ॥ ૧.૨૫॥

અસત્યત્વં યદિ ભવેત્ સત્યત્વં ન વદિષ્યતિ ।
શુભં યદ્યશુભં વિદ્ધિ અશુભાચ્છુભમિષ્યતે ॥ ૧.૨૬॥

ભયં યદ્યભયં વિદ્ધિ અભયાદ્ભયમાપતેત્ ।
બન્ધત્વમપિ ચેન્મોક્ષો બન્ધાભાવે ન મોક્ષતા ॥ ૧.૨૭॥

મરણં યદિ ચેજ્જન્મ જન્માભાવે મૃતિર્ન ચ ।
ત્વમિત્યપિ ભવેચ્ચાહં ત્વં નો ચેદહમેવ ન ॥ ૧.૨૮॥

ઇદં યદિ તદેવાસ્તિ તદભાવાદિદં ન ચ ।
અસ્તીતિ ચેન્નાસ્તિ તદા નાસ્તિ ચેદસ્તિ કિઞ્ચન ॥ ૧.૨૯॥

કાર્યં ચેત્કારણં કિઞ્ચિત્ કાર્યાભાવે ન કારણમ્ ।
દ્વૈતં યદિ તદાઽદ્વૈતં દ્વૈતાભાવેઽદ્વયં ન ચ ॥ ૧.૩૦॥

દૃશ્યં યદિ દૃગપ્યસ્તિ દૃશ્યાભાવે દૃગેવ ન ।
અન્તર્યદિ બહિસ્સત્યમન્તાભાવે બહિર્ન ચ ॥ ૧.૩૧॥

પૂર્ણત્વમસ્તિ ચેત્કિઞ્ચિદપૂર્ણત્વં પ્રસજ્યતે ।
તસ્માદેતત્ક્વચિન્નાસ્તિ ત્વં ચાહં વા ઇમે ઇદમ્ ॥ ૧.૩૨॥

નાસ્તિ દૃષ્ટાન્તકસ્સત્યે નાસ્તિ દાર્ષ્ટાન્તિકં હ્યજે ।
પરં બ્રહ્માહમસ્મીતિ સ્મરણસ્ય મનો ન હિ ॥ ૧.૩૩॥

બ્રહ્મમાત્રં જગદિદં બ્રહ્મમાત્રં ત્વમપ્યહમ્ ।
ચિન્માત્રં કેવલં ચાહં નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૧.૩૪॥

ઇદં પ્રપઞ્ચં નાસ્ત્યેવ નોત્પન્નં ન સ્થિતં ક્વચિત્ ।
ચિત્તં પ્રપઞ્ચમિત્યાહુર્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૧.૩૫॥

ન પ્રપઞ્ચં ન ચિત્તાદિ નાહઙ્કારો ન જીવકઃ ।
માયાકાર્યાદિકં નાસ્તિ માયા નાસ્તિ ભયં ન ચ ॥ ૧.૩૬॥

કર્તા નાસ્તિ ક્રિયા નાસ્તિ શ્રવણં મનનં ન હિ ।

સમાધિદ્વિતયં નાસ્તિ માતૃમાનાદિ નાસ્તિ હિ ॥ ૧.૩૭॥

અજ્ઞાનં ચાપિ નાસ્ત્યેવ હ્યવિવેકઃ કદા ચ ન ।
અનુબન્ધચતુષ્કં ન સમ્બન્ધત્રયમેવ ન ॥ ૧.૩૮॥

ન ગઙ્ગા ન ગયા સેતુર્ન ભૂતં નાન્યદસ્તિ હિ ।
ન ભૂમિર્ન જલં નાગ્નિર્ન વાયુર્ન ચ ખં ક્વચિત્ ॥ ૧.૩૯॥

ન દેવો ન ચ દિક્પાલા ન વેદા ન ગુરુઃ ક્વચિત્ ।
ન દૂરં નાતિકં નાન્તં ન મધ્યં ન ક્વચિત્ સ્થિતમ્ ॥ ૧.૪૦॥

નાદ્વૈતદ્વૈતસત્યં વા હ્યસત્યં વા ઇદં ચ ન ।
બન્ધમોક્ષાદિકં નાસ્તિ સદ્વાઽસદ્વા સુખાદિ વા ॥ ૧.૪૧॥

જાતિર્નાસ્તિ ગતિર્નાસ્તિ વર્ણો નાસ્તિ ન લૌકિકમ્ ।
સર્વં બ્રહ્મેતિ નાસ્ત્યેવ બ્રહ્મ ઇત્યેવ નાસ્તિ હિ ॥ ૧.૪૨॥

ચિદિત્યેવેતિ નાસ્ત્યેવ ચિદહં ભાષણં ન હિ ।
અહં બ્રહ્માસ્મિ નાસ્ત્યેવ નિત્યશુદ્ધોઽસ્મિ ન ક્વચિત્ ॥ ૧.૪૩॥

વાચા યદુચ્યતે કિઞ્ચિન્મનસા મનુતે ક્વચિત્ ।
બુદ્ધ્યા નિશ્ચિનુતે નાસ્તિ ચિત્તેન જ્ઞાયતે ન હિ ॥ ૧.૪૪॥

યોગિયોગાદિકં નાસ્તિ સદા સર્વં સદા ન ચ ।
અહોરાત્રાદિકં નાસ્તિ સ્નાનધ્યાનાદિકં ન હિ ॥ ૧.૪૫॥

ભ્રાન્ત્યભ્રાન્ત્યાદિકં નાસ્તિ નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ।
વેદશાસ્ત્રં પુરાણં ચ કાર્યં કારણમીશ્વરઃ ॥ ૧.૪૬॥

લોકો ભૂતં જનસ્ત્વૈક્યં સર્વં મિથ્યા ન સંશયઃ ।
વાચા વદતિ યત્કિઞ્ચિત્સઙ્કલ્પૈઃ કલ્પ્યતે ચ યત્ ॥ ૧.૪૭॥

મનસા ચિન્ત્યતે યદ્યત્ સર્વં મિથ્યા ન સંશયઃ ।
બુદ્ધ્યા નિશ્ચીયતે કિઞ્ચિચ્ચિત્તે નિશ્ચીયતે ક્વચિત્ ॥ ૧.૪૮॥

શાસ્ત્રૈઃ પ્રપઞ્ચ્યતે યદ્યત્ નેત્રેણૈવ નિરીક્ષ્યતે ।
શ્રોત્રાભ્યાં શ્રૂયતે યદ્યદન્યત્સદ્ભાવમેવ ચ ॥ ૧.૪૯॥

ત્વમહં તદિદં સોઽહમન્યત્ સદ્ભાવમેવ ચ ।
નેત્રં શ્રોત્રં ગાત્રમેવ મિથ્યેતિ ચ સુનિશ્ચિતમ્ ॥ ૧.૫૦॥

ઇદં મિથ્યૈવ નિર્દિષ્ટમયમિત્યેવ કલ્પ્યતે ।
યદ્યત્સમ્ભાવ્યતે લોકે સર્વં સઙ્કલ્પસમ્ભ્રમઃ ॥ ૧.૫૧॥

સર્વાધ્યાસં સર્વગોપ્યં સર્વભોગપ્રભેદકમ્ ।
સર્વદોષપ્રભેદં ચ નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૧.૫૨॥

મદીયં ચ ત્વદીયં ચ મમેતિ ચ તવેતિ ચ ।
મહ્યં તુભ્યં મયેત્યાદિ તત્સર્વં વિતથં ભવેત્ ॥ ૧.૫૩॥

રક્ષકો વિષ્ણુરિત્યાદિ બ્રહ્મા સૃષ્ટેસ્તુ કારણમ્ ।
સંહારે રુદ્ર ઇત્યેવં સર્વં મિથ્યેતિ નિશ્ચિનુ ॥ ૧.૫૪॥

સ્નાનં જપસ્તપો હોમસ્સ્વાધ્યાયો દેવપૂજનમ્ ।
મન્ત્રં તન્ત્રં ચ સત્સઙ્ગો ગુણદોષવિજૃમ્ભણમ્ ॥ ૧.૫૫॥

અન્તઃકરણસદ્ભાવોઽવિદ્યાયાશ્ચ સમ્ભવઃ ।
અનેકકોટિબ્રહ્માણ્ડં સર્વં મિથ્યેતિ નિશ્ચિનુ ॥ ૧.૫૬॥

સર્વદેશિકવાક્યોક્તિર્યેનકેનાપિ નિશ્ચિતા ।
દૃશ્યતે જગતિ યદ્યત્ યદ્યજ્જગતિ વીક્ષ્યતે ॥ ૧.૫૭॥

વર્તતે જગતિ યદ્યત્ સર્વં મિથ્યેતિ નિશ્ચિનુ ।
યેનેકેનાક્ષરેણોક્તં યેનેકેન વિવર્ણિતમ્ ॥ ૧.૫૮॥

યેનેકેનાપિ ગદિતં યેનેકેનાપિ મોદિતમ્ ।
યેનકેનાપિ યદ્દત્તં યેનકેનાપિ યત્કૃતમ્ ॥ ૧.૫૯॥

યત્ર યત્ર શુભં કર્મ યત્ર યત્ર ચ દુષ્કૃતમ્ ।
યદ્યત્કરોતિ સત્યેન સર્વં મિથ્યેતિ નિશ્ચિનુ ॥ ૧.૬૦॥

ઇદં પ્રપઞ્ચં યત્કિઞ્ચિત્ યદ્યજ્જગતિ વિદ્યતે ।
દૃશ્યરૂપં ચ દૃગ્રૂપં સર્વં શશવિષાણવત્ ॥ ૧.૬૧॥

શ્રી ગુરુમૂર્તિઃ ।
એવં શ્રુત્વા નિદાઘસ્સ બ્રહ્મન્ સંશયવેષ્ટિતઃ ।
ઋભું પપ્રચ્છ પુનરપ્યાત્મવિજ્ઞાનસિદ્ધયે ॥ ૧.૬૨॥

નિદાઘઃ ।
સ્વામિન્ મુમુક્ષોસ્સંસારાન્મમારૂપેણ વસ્તુના ।
પ્રપઞ્ચિતેન ન ફલં ભવેદિતિ હિ મે મતિઃ ॥ ૧.૬૩॥

યતસ્ત્વત્કથિતં બ્રહ્મ તત્ત્વમસ્યાદ્યગોચરમ્ ।
અખણ્ડૈકરસાતીતં મોક્ષાતીતં ચ સદ્ગુરો ॥ ૧.૬૪॥

જ્ઞેયત્વાદિવિહીનં તત્ કથં જ્ઞાસ્યામ્યહં નુ વા ।
તજ્જ્ઞાનેન ફલં કિં વા મોક્ષસ્યૈવ ફલત્વતઃ ॥ ૧.૬૫॥

ફલમાસ્તિક્યબુદ્ધ્યા સ્યાન્ ન ચૈવમ્ભૂતવસ્તુનઃ ।
ત્વદુક્તનિશ્ચયે સર્વેષાં કર્યં ચ પ્રસજ્યતે ॥ ૧.૬૬॥

યદ્યુક્તવ્યતિરિક્તાનાં સર્વેષાં સ્યાદનાત્મતા ।
હેયત્વાન્નૈવ જિજ્ઞાસ્યં કિઞ્ચિદપ્યત્ર સિદ્ધ્યતિ ॥ ૧.૬૭॥

શશશૃઙ્ગસમાનત્વં યથાપ્રોક્તમનાત્મનામ્ ।
અત્યન્તારૂપવત્ત્વેન તથા તત્સિદ્ધિરાત્મનઃ ॥ ૧.૬૮॥

અથવા તત્ તથૈવાસ્તામન્યથા વાપિ મે ગુરો ।
યજ્જ્ઞાનેન ભવાન્મુક્તિર્ભવેત્ તદ્બ્રૂહિ વેદિતુમ્ ॥ ૧.૬૯॥

એવમુક્તો નિદાઘેન કુશાગ્રમતિના પરમ્ ।
ઋભુસ્સન્તુષ્ટહૃદયઃ પુનરેવાબ્રવીદિદમ્ ॥ ૧.૭૦॥

ઋભુઃ ।
નિદાઘ સત્યમેવૈતત્ત્વદુક્તં યુક્તિગર્ભિતમ્ ।
તથાપિ યુક્તં મદ્વાક્યં ત્રૈવિદ્ધ્યાજ્જ્ઞેયવસ્તુનઃ ॥ ૧.૭૧॥

સગુણં નિર્ગુણં તાભ્યામન્યન્નિષ્પ્રતિયોગિકમ્ ।
બ્રહ્મૈવં ત્રિવિધં લિઙ્ગૈર્વેદાન્તેષુ હિ વિશ્રુતમ્ ॥ ૧.૭૨॥

તત્રાદ્યં હેયગુણકં સોપાધિત્વાન્મુમુક્ષુભિઃ ।
તત્ત્વમસ્યાદિવાચ્યત્વાજ્જ્ઞેયં હેયતયાગ્રતઃ ॥ ૧.૭૩॥

જીવેશ્વરવિભાગેન સગુણં દ્વિવિધં ભવેત્ ।
જીવશ્ચ ત્રિવિધસ્તદ્વદીશશ્ચાસ્તામિદં તથા ॥ ૧.૭૪॥

ઉપાદેયં દ્વિતીયં સ્યાન્નિર્ગુણં મોક્ષકાઙ્ક્ષિભિઃ ।
તત્ત્વમસ્યાદિલક્ષ્યત્વાજ્જ્ઞેયં ચાત્મતયા તતઃ ॥ ૧.૭૫॥

હેયોપાદેયશૂન્યં તત્તૃતીયં પ્રકૃતં યતઃ ।
મુક્તૈઃ પ્રાપ્યમતશ્શબ્દમપિ જ્ઞેયં મુમુક્ષુભિઃ ॥ ૧.૭૬॥

ઇદન્ત્વેનાપ્યહન્ત્વેન સ્વત્વેનાપિ ન વેદ્યતા ।

તથાપ્યસ્યાસ્તિ વેદ્યત્વં શ્રુત્યુક્તત્વાન્ન નાસ્તિતા ॥ ૧.૭૭॥

મુક્તસ્ય સ્વગતો ભેદો યદનાપ્તૌ ન નશ્યતિ ।
તજ્જ્ઞાને ફલમેતત્સ્યાત્ સર્વભેદનિબર્હણમ્ ॥ ૧.૭૮॥

અતોઽસ્યાલક્ષણત્વેન સદસત્પરતાસ્ત્યપિ ।
શશશ‍ૃઙ્ગસમાનત્વં નિદાઘાશક્યમીરિતુમ્ ॥ ૧.૭૯॥

વિશેષસત્તાઽભાવેઽપિ સત્તાસામાન્યતા યતઃ ।
નિર્દ્વન્દ્વત્વેન સંસિદ્ધા તતસ્સત્ત્વાદિકં ભવેત્ ॥ ૧.૮૦॥

અથવા શશશ‍ૃઙ્ગાદિ સાદૃશ્યં ભવતુ સ્વતઃ ।
સિદ્ધાન્તતા શ્રુતિપ્રોક્તા નૈરાશ્યસ્ય હિ સુવ્રત ॥ ૧.૮૧॥

ન તાવતા વિરોધોઽસ્તિ કશ્ચિદપ્યધુના તવ ।
સંસારમોક્ષસિદ્ધ્યર્થમસ્યાનુક્તતયા મયા ॥ ૧.૮૨॥

॥ ઇતિ શ્રી ગુરુજ્ઞાનવાસિષ્ઠે તત્ત્વનારાયણે
જ્ઞાનકાણ્ડસ્ય પ્રથમપાદે તૃતીયોઽધ્યાયઃ એવં
શ્રી ઋભુગીતા પ્રથમોઽધ્યાયઃ સમાપ્તઃ ॥

## દ્વિતીયોઽધ્યાયઃ

અથાતસ્સમ્પ્રવક્ષ્યામિ નિદાઘ શ‍ૃણુ સાદરમ્ ।
સંસારમોક્ષસિદ્ધ્યર્થં સરૂપં બ્રહ્મ નિર્ગુણમ્ ॥ ૨.૦૧॥

તત્ત્વમસ્યાદિવાક્યૈર્યલ્લક્ષ્યં જીવાદિકારણમ્ ।
નિત્યશુદ્ધવિબુદ્ધં ચ નિત્યમુક્તં ચ શાશ્વતમ્ ॥ ૨.૦૨॥

યત્સર્વવેદસિદ્ધાન્તં યજ્જ્ઞાનેનૈવ મુક્તતા ।
જીવસ્ય યચ્ચ સમ્પૂર્ણં તત્ત્વમેવાસિ નિર્મલમ્ ॥ ૨.૦૩॥

ત્વમેવ પરમાત્માસિ ત્વમેવ પરમોગુરુઃ ।
ત્વમેવાકાશરૂપોઽસિ સાક્ષિહીનોઽસિ સર્વદા ॥ ૨.૦૪॥

ત્વમેવ સર્વભાવોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ।
કાલહીનોઽસિ કાલોઽસિ સદા બ્રહ્માસિ ચિદ્ઘનઃ ॥ ૨.૦૫॥

સર્વતસ્સર્વરૂપોઽસિ ચૈતન્યઘનવાનસિ ।
સર્વભૂતાન્તરસ્થોઽસિ કર્માધ્યક્ષોઽસિ નિર્ગુણઃ ॥ ૨.૦૬॥

સત્યોઽસિ સિદ્ધોઽસિ સનાતનોઽસિ મુક્તોઽસિ મોક્ષોઽસિ મુદાઽમૃતોઽસિ ।
દેવોઽસિ શાન્તોઽસિ નિરામયોઽસિ બ્રહ્માસિ પૂર્ણોઽસિ પરાત્પરોઽસિ ॥ ૨.૦૭॥

સમોઽસિ સચ્ચાસિ ચિરન્તનોઽસિ સત્યાદિવક્યૈઃ પ્રતિબોધિતોઽસિ ।
સર્વાઙ્ગહીનોઽસિ સદાસ્થિતોઽસિ બ્રહ્મેન્દ્રરુદ્રાદિવિભાવિતોઽસિ ॥ ૨.૦૮॥

સર્વપ્રપઞ્ચભ્રમવર્જિતોઽસિ સર્વેષુ ભૂતેષુ ચ ભાવિતોઽસિ ।
સર્વત્ર સઙ્કલ્પવિવર્જિતોઽસિ સર્વાગમાન્તાર્થવિભાવિતોઽસિ ॥ ૨.૦૯॥

સર્વત્ર સન્તોષસુખાસનોઽસિ સર્વત્ર ગત્યાદિવિવર્જિતોઽસિ ।
સર્વત્ર લક્ષ્યાદિ વિવર્જિતોઽસિ ધ્યાતોઽસિ વિષ્ણ્વાદિસુરૈરજસ્રમ્ ॥ ૨.૧૦॥

ચિદાકારસ્વરૂપોઽસિ ચિન્માત્રોઽસિ નિરઙ્કુશઃ ।
આત્મન્યેવ સ્થિતોઽસિ ત્વં સર્વશૂન્યોઽસિ નિશ્ચલઃ ॥ ૨.૧૧॥

આનન્દોઽસિ પરોઽસિ ત્વમેકમેવાદ્વિતીયકઃ ।
ચિદ્ઘનાનન્દરૂપોઽસિ પરિપૂર્ણસ્વરૂપકઃ ॥ ૨.૧૨॥

સદસિ ત્વમભિજ્ઞોઽસિ સોઽસિ જાનાસિ વીક્ષ્યસિ ।
સચ્ચિદાનન્દરૂપોઽસિ વાસુદેવોઽસિ વૈ પ્રભુઃ ॥ ૨.૧૩॥

અમૃતોઽસિ વિભુશ્ચાસિ ચઞ્ચલોસ્યચલોહ્યસિ ।
સર્વોઽસિ સર્વહીનોઽસિ શાન્તાશાન્તવિવર્જિતઃ ॥ ૨.૧૪॥

સત્તામાત્રપ્રકાશોઽસિ સત્તાસામાન્યકોહ્યસિ ।
નિત્યસિદ્ધસ્વરૂપોઽસિ સર્વસિદ્ધિવિવર્જિતઃ ॥ ૨.૧૫॥

ઈષણ્માત્રવિશૂન્યોઽસિ હ્યણુમાત્રવિવર્જિતઃ ।
અસ્તિત્વવર્જિતોઽસિ ત્વં નાસ્તિત્વાદિવિવર્જિતઃ ॥ ૨.૧૬॥

લક્ષ્યલક્ષણહીનોઽસિ નિર્વિકારો નિરામયઃ ।
સર્વનાદાન્તરોઽસિ ત્વં કલાકાષ્ઠાદિવર્જિતઃ ॥ ૨.૧૭॥

બ્રહ્મવિષ્ણ્વીશહીનોઽસિ સ્વસ્વરૂપં પ્રપશ્યસિ ।
સ્વસ્વરૂપાવશેષોઽસિ સ્વાનન્દાબ્ધૌ નિમજ્જસિ ॥ ૨.૧૮॥

સ્વાત્મરાજ્યે સ્વમેવાસિ સ્વયમ્ભાવવિવર્જિતઃ ।
શિષ્ટપૂર્ણસ્વરૂપોઽસિ સ્વસ્માત્કિઞ્ચિન્નપશ્યસિ ॥ ૨.૧૯॥

સ્વસ્વરૂપાન્ન ચલસિ સ્વસ્વરૂપેણ જૃમ્ભસિ ।

સ્વસ્વરૂપાદનન્યોઽસિ હ્યહમેવાસિ નિશ્ચિનુ ॥ ૨.૨૦॥

ઇદં પ્રપઞ્ચં યત્કિઞ્ચિદ્યદ્યજ્જગતિ વિદ્યતે ।
દૃશ્યરૂપં ચ દૃગ્રૂપં સર્વં શશવિષાણવત્ ॥ ૨.૨૧॥

લક્ષ્યલક્ષણહીનત્વાદ્યુક્ત્યા નિષ્પ્રતિયોગિકમ્ ।
ન મન્તવ્યં યથાયોગ્યં લૌકિકૈસ્ત્વં વિનિશ્ચિનુ ॥ ૨.૨૨॥

નિર્ગુણં નિર્મલં શાન્તં બ્રહ્મસપ્રતિયોગિકમ્ ।
શુદ્ધાન્તઃકરણજ્ઞેયં વેદોક્તં પ્રકૃતં ખલુ ॥ ૨.૨૩॥

આત્મસ્ત્વં સચ્ચિદાનન્દલક્ષણૈર્લક્ષ્યમદ્વયમ્ ।
બ્રહ્મૈવાસ્મિ ન દેહોઽયમિતિ ચિત્તેઽવધારય ॥ ૨.૨૪॥

દેહોઽહમિતિ સઙ્કલ્પસ્તદન્તઃકરણં  સ્મૃતમ્ ।
દેહોઽહમિતિ સઙ્કલ્પો મહાન્ સંસાર ઉચ્યતે ॥ ૨.૨૫॥

દેહોઽહમિતિ સઙ્કલ્પસ્તદ્બન્ધ ઇતિ ચોચ્યતે ।
દેહોઽહમિતિ સઙ્કલ્પસ્તદ્દુઃખમિતિ ચોચ્યતે ॥ ૨.૨૬॥

દેહોઽહમિતિ યજ્જ્ઞાનં તદેવ નરકં સ્મૃતમ્ ।
દેહોઽહમિતિ સઙ્કલ્પો જગત્સર્વં સમીર્યતે ॥ ૨.૨૭॥

દેહોઽહમિતિ સઙ્કલ્પો હૃદયગ્રન્થિરીરિતઃ ।
દેહોઽહમિતિ યજ્જ્ઞાનં તદસજ્જ્ઞાનમેવ ચ ॥ ૨.૨૮॥

દેહોઽહમિતિ યદ્બુદ્ધિઃ સા ચાવિદ્યેતિ ભણ્યતે ।
દેહોઽહમિતિ યજ્જ્ઞાનં તદેવ દ્વૈતમુચ્યતે ॥ ૨.૨૯॥

દેહોઽહમિતિ સઙ્કલ્પસ્સત્યજીવસ્સ એવ ચ ।
દેહોઽહમિતિ યજ્જ્ઞાનં પરિચ્છિન્નમિતીરિતમ્ ॥ ૨.૩૦॥

દેહોઽહમિતિ સઙ્કલ્પો મહાપાપમિતિ સ્ફુટમ્ ।
દેહોઽહમિતિ યા બુદ્ધિસ્તૃષ્ણાદોષામયઃ કિલ ॥ ૨.૩૧॥

યત્કિઞ્ચિદપિ સઙ્કલ્પસ્તાપત્રયમિતીરિતમ્ ।
તચ્ચ સર્વં મનુષ્યાણાં માનસં હિ નિગદ્યતે ॥ ૨.૩૨॥

કામં ક્રોધં બન્ધનં સર્વદુઃખં વિશ્વં દોષં કાલનાનાસ્વરૂપમ્ ।
યત્કિઞ્ચેદં સર્વસઙ્કલ્પજાતં તત્કિઞ્ચેદં માનસં સોમ્ય વિદ્ધિ ॥ ૨.૩૩॥

મન એવ જગત્સર્વં મન એવ મહારિપુઃ ।
મન એવ હિ સંસારો મન એવ જગત્ત્રયમ્ ॥ ૨.૩૪॥

મન એવ મહદ્દુઃખં મન એવ જરાદિકમ્ ।
મન એવ હિ કાલશ્ચ મન એવ મલં તથા ॥ ૨.૩૫॥

મન એવ હિ સઙ્કલ્પો મન એવ ચ જીવકઃ ।
મન એવ હિ ચિત્તં ચ મનોઽહઙ્કાર એવ ચ ॥ ૨.૩૬॥

મન એવ મહાન્ બન્ધો મનોઽન્તઃકરણં ચ તત્ ।
મન એવ હિ ભૂમિશ્ચ મન એવ હિ તજ્જલમ્ ॥ ૨.૩૭॥

મન એવ હિ તેજશ્ચ મન એવ મરુન્મહાન્ ।
મન એવ હિ ચાકાશો મન એવ હિ શબ્દકઃ ॥ ૨.૩૮॥

સ્પર્શરૂપરસા ગન્ધઃ કોશાઃ પઞ્ચ મનોભવાઃ ।
જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિ મનોમયમિતીરિતમ્ ॥ ૨.૩૯॥

દિક્પાલા વસવો રુદ્રા આદિત્યાશ્ચ મનોમયાઃ ।
દૃશ્યં બન્ધં દ્વન્દ્વજાતમજ્ઞાનં માનસં સ્મૃતમ્ ॥ ૨.૪૦॥

સઙ્કલ્પમેવ યત્કિઞ્ચિત્તત્તન્નાસ્તીતિ નિશ્ચિનુ ।
નાસ્તિ નાસ્તિ જગત્સર્વં ગુરુશિષ્યાદિકં ન હિ ॥ ૨.૪૧॥

વ્યવહારદશાયાં હિ ગુરુશિષ્યાદિકં ભવેત્ ।
પરમાર્થદશાયાં તત્ કથં મુક્તૌ પ્રસિદ્ધ્યતિ ॥ ૨.૪૨॥

મુક્ત્યતીતદશાયાં ચ પ્રોચ્યતે પરમાર્થતા ।
તથાપ્યસત્યહન્તૃત્વાન્મુક્તેરેવાસ્તિ મુખ્યયાઃ ॥ ૨.૪૩॥

મનસા કલ્પિતં સર્વં મનસા પરિપાલિતમ્ ।
મનસા સંસ્મૃતં તસ્માન્મન એવાસ્તિ કારણમ્ ॥ ૨.૪૪॥

મનસા સંસ્મૃતં સર્વં મનસૈવ ચ વિસ્મૃતમ્ ।
મનસા ભાવિતં સર્વં મનસૈવ હ્યભાવિતમ્ ॥ ૨.૪૫॥

મનસા દૂષિતં સર્વં મનસૈવ ચ ભૂષિતમ્ ।
મનસા સુખવૃત્તિસ્સ્યાન્મનસા દુઃખસઞ્ચયઃ ॥ ૨.૪૬॥

તસ્માત્સર્વનિદાનં તન્મનસ્સૂક્ષ્મં પરાત્મનિ ।
ત્વયિ સચ્ચિત્સુખામ્બોધૌ કલ્પિતં વિદ્ધિ માયયા ॥ ૨.૪૭॥

ત્વદન્યસ્ય ચ સર્વસ્ય કલ્પિતત્વાદબોધતઃ ।
ત્વમેવ સર્વસાક્ષી સન્ સ્વયં ભાસિ નિરન્તરમ્ ॥ ૨.૪૮॥

તવ બોધસ્વરૂપત્વાત્ ત્વય્યબોધસ્ય કા ગતિઃ ।
મન્દબુદ્ધ્યા ગતૌ સત્યામપિ નાશસ્સ્વયં ભવેત્ ॥ ૨.૪૯॥

નિત્યબોધસ્વરૂપસ્ત્વં હ્યબોધપ્રતિયોગિકઃ ।
ત્વયિ તત્સન્નિવર્તેત તમસ્સૂર્યોદયે યથા ॥ ૨.૫૦॥

જ્ઞાતૃજ્ઞાને પ્રકલ્પ્યેતે યત્ર જ્ઞેયેઽદ્વયે ત્વયિ ।
તસ્યાખણ્ડસ્વરૂપત્વાત્ સર્વાધિષ્ઠાનતોચિતા ॥ ૨.૫૧॥

મુમુક્ષુભિશ્ચ વિજ્ઞેયાસ્સ્વધર્માસ્સચ્ચિદાદયઃ ।
સન્મયશ્ચિન્મયશ્ચાત્મા તથાનન્દમયો યતઃ ॥ ૨.૫૨॥

ચિદ્રૂપસ્ય તવાત્મત્વાદનાત્માનસ્ત્વચિન્મયાઃ ।
અનાત્મનાં વિકારિત્વાન્નિર્વિકારસ્ત્વમિષ્યસે ॥ ૨.૫૩॥

વિકારસ્ય સમસ્તસ્યાપ્યવિદ્યાકલ્પિતત્વતઃ ।
વિલયે નિર્વિકારસ્ત્વં વિદ્યાવાનવશિષ્યસે ॥ ૨.૫૪॥

બૃહદ્ બ્રહ્માવશેષો હિ નાશઃ કલ્પિતવસ્તુનઃ ।
યચ્છેષાસ્સ્યુરિમે સર્વે સ શેષી નિત્યતાં વ્રજેત્ ॥ ૨.૫૫॥

શેષસ્ય શેષ્યનન્યત્વં વાસ્તવં સર્વસમ્મતમ્ ।
શેષિણસ્તુ તવાન્યત્વાન્ન શેષસ્યાસ્તિ નિત્યતા ॥ ૨.૫૬॥

શેષિણશ્શેષસાપેક્ષ્યાન્ન સ્વાતન્ત્ર્યેણ શેષિતા ।
ઇતિ વક્તું ન શક્યં હિ સ્વમહિમ્નિ સ્થિતત્વતઃ ॥ ૨.૫૭॥

સ્વસ્યૈષ મહિમા સર્વવ્યાપકત્વાદિલક્ષણઃ ।
સર્વશ્રુત્યાદિ સંસિદ્ધઃ કા ભીર્હીયેત યુક્તિભિઃ ॥ ૨.૫૮॥

વ્યાપ્યસાપેક્ષતા તસ્ય વ્યાપકસ્યેતિ ચેચ્છૃણુ ।
વ્યાપ્યાનપેક્ષં સિદ્ધિર્હિ વ્યાપકસ્ય નિજાશ્રયાત્ ॥ ૨.૫૯॥

વ્યાપ્યસ્યૈવ હિ જીવસ્ય વિકારાપેક્ષયા તથા ।
વ્યાપકાપેક્ષયા ચ સ્યાત્ સ્થિતિર્ન વ્યાપકસ્ય તુ ॥ ૨.૬૦॥

વિકારાલમ્બનાભાવાત્સ્વાલમ્બનતયાપિ ચ ।

સર્વાલમ્બનતા સિદ્ધા ન સ્વહાનેશ્ચ સઙ્ગતિઃ ॥ ૨.૬૧॥

સર્વાધારસ્ય નાધારોઽપેક્ષ્યતેપિ ક્વચિદ્વિભોઃ ।
સ ચેદાધારસાપેક્ષો ન સર્વાધારતાં વ્રજેત્ ॥ ૨.૬૨॥

સર્વાધારસ્ય ચ વ્યોમ્નો યથાઽઽત્માધાર ઇષ્યતે ।
તથાઽઽત્મનોઽપિ કશ્ચિત્સ્યાદિતિ ચેદ્બાઢમુચ્યતે ॥ ૨.૬૩॥

આત્મૈવાત્મન આધાર આત્મન્યેવાત્મનસ્સ્થિતેઃ ।
અનાત્મનો યથાઽનાત્મા કશ્ચિદેવાસ્તિ ચાશ્રયઃ ॥ ૨.૬૪॥

આત્મનોઽપિ તુ નાનાત્વે સ્યાદનાત્માવિશેષતા ।
ઇતિ ચેન્નૈષ ભેદો હિ વિકારાવાશ્રયો ભવેત્ ॥ ૨.૬૫॥

યથા ભવતિ દેહસ્ય પ્રાણ એવાશ્રયઃ પુનઃ ।
પ્રાણસ્ય ચાશ્રયો દેહસ્તથાઽઽત્માઽનાત્મનોરપિ ॥ ૨.૬૬॥

અન્યોન્યાશ્રયતા પ્રાપ્તા તથા નાશો દ્વયોરપિ ।
ઇતિ ચેદુક્તમેવૈતદાત્મા હિ સ્વાશ્રયો મતઃ ॥ ૨.૬૭॥

આશ્રયાશ્રયિ વાર્તા ચ વ્યવહારે નિગદ્યતે ।
પરમાર્થદશાયાં તુ સ્વસ્માદન્યન્ન વિદ્યતે ॥ ૨.૬૮॥

આત્મનસ્સ્વગતો ભેદો યોસ્મિન્નભ્યુપગમ્યતે ।
સ કિં નિત્યોઽસ્ત્યનિત્યો વેત્યેવં પ્રશ્ને તુ કથ્યતે ॥ ૨.૬૯॥

લબ્ધાત્મસમ્યગ્બોધસ્ય તવ યાવદિહ સ્થિતિઃ ।
તાવત્તસ્યાવિનાશિત્વાન્નિત્ય એવેતિ નિર્ણયઃ ॥ ૨.૭૦॥

પશ્ચાદનિત્યતાયાશ્ચ તવ પ્રષ્ટુરભાવતઃ ।
સ્વભેદાનિત્યવાર્તાયા નાવકાશોઽત્ર વિદ્યતે ॥ ૨.૭૧॥

આત્મા સ કિં ભવેદ્દ્રષ્ટા દૃશ્યો વા કિન્નુ દર્શનમ્ ।
દ્રષ્ટૃત્વે સતિ જીવત્વાત્સંસારિત્વં પ્રસજ્યતે ॥ ૨.૭૨॥

દૃશ્યત્વે તુ ઘટાદીનામિવ સ્યાદ્વિષયાત્મતા ।
દર્શનત્વે તુ વૃત્તિત્વાજ્જાડ્યમેવ પ્રસજ્યતે ॥ ૨.૭૩॥

અસંસારી પરાત્માઽસૌ સ્વયં નિર્વિષયસ્તથા ।
ચૈતન્યરૂપ ઇત્યેતદ્વ્યર્થમેવેતિ ચેચ્છૃણુ ॥ ૨.૭૪॥

દ્રષ્ટ્ત્વં તસ્ય વિદ્ધ્યેવં જીવેશાદીક્ષિતૃત્વતઃ ।
દૃશ્યત્વં ચ તથા વિદ્ધિ મુક્તૈર્દ્રષ્ટ્ત્વતસ્સ્વતઃ ॥ ૨.૭૫॥

દર્શનત્વં ચ સાક્ષિત્વાદ્દૃગ્રૂપત્વાચ્ચ તસ્ય વૈ ।
સંસારિત્વાદયો દોષાઃ પ્રસજ્યન્તે ન તત્ર વૈ ॥ ૨.૭૬॥

અસંસારિણમાત્માનં સંસાર્યાત્મા યદિ સ્વયમ્ ।
પશ્યેત્તદાક્ષિરોગી સમ્પ્રપશ્યેચ્ચ નિરઙ્કુશમ્ ॥ ૨.૭૭॥

અસમ્ભવાનિ સર્વાણિ સમ્ભવેયુશ્ચ વૈદિકાઃ ।
સિદ્ધાન્તા નિયમાપેતાસ્સ્વેચ્છાવ્યાહારસમ્ભવાત્ ॥ ૨.૭૮॥

ઇતિ ચેન્નૈવ દોષોઽસ્તિ સંસારસ્યાપવાદતઃ ।
વિશુદ્ધસત્વસમ્પન્નસ્સંસારી નિર્મલો હિ સઃ ॥ ૨.૭૯॥

યદિ જીવસ્ય સંસારસ્સ્વતસ્સિદ્ધસ્તથાઽખિલાઃ ।
ઉક્તદોષાઃ પ્રસજ્યેરન્નજ્ઞાનાદ્ધ્યાગતો ન તે ॥ ૨.૮૦॥

જીવસ્ય યદિ સંસારો બ્રહ્મણસ્તદભાવતઃ ।
બ્રહ્માત્મત્વોપદેશોઽયમયુક્ત ઇતિ ચેચ્છૃણુ ॥ ૨.૮૧॥

ઉક્તજીવૈકદેશસ્ય હ્યસંસારિત્વમન્વહમ્ ।
તતસ્તત્ત્વોપદેશેઽસ્મિન્ નિદાઘાસ્ત્યનવદ્યતા ॥ ૨.૮૨॥

તસ્માત્સર્વગતં સત્યસુખબોધૈકલક્ષણમ્ ।
બ્રહ્માસ્મીતિ વિજાનીહિ કેવલં ત્વમસંશયમ્ ॥ ૨.૮૩॥

મુક્ત્યૈ જ્ઞેયં ચ તદ્બ્રહ્મ સચ્ચિદાનન્દલક્ષણમ્ ।
ન ત્વલક્ષણમન્યત્સ્યાદિતિ ચોક્તં ન વિસ્મર ॥ ૨.૮૪॥

॥ ઇતિ શ્રી ગુરુજ્ઞાનવાસિષ્ઠે તત્ત્વનારાયણે
જ્ઞાનકાણ્ડસ્ય પ્રથમપાદે ચતુર્થોઽધ્યાયઃ એવં
શ્રી ઋભુગીતા દ્વિતીયોઽધ્યાયઃ સમાપ્તઃ ॥

## તૃતીયોઽધ્યાયઃ

પુનર્જ્ઞાનં પ્રવક્ષ્યામિ નિદાઘ શૃણુ સાદરમ્ ।
બ્રહ્મણોઽતિ દુરૂહત્વાદસકૃચ્છ્રાવ્યમેવ તત્ ॥ ૩.૦૧॥

સર્વં ચિન્મયં વિદ્ધિ સર્વં સચ્ચિન્મયં તતમ્ ।

સચ્ચિદાનન્દમદ્વૈતં સચ્ચિદાનન્દમવ્યયમ્ ॥ ૩.૦૨॥

સચ્ચિદાનન્દમાત્રં હિ સચ્ચિદાનન્દમન્યકમ્ ।
સચ્ચિદાનન્દરૂપોઽહં સચ્ચિદાનન્દમેવ ખમ્ ॥ ૩.૦૩॥

સચ્ચિદાનન્દમેવ ત્વં સચ્ચિદાનન્દકોઽસ્મ્યહમ્ ।
મનોબુદ્ધિરહઙ્કારચિત્તસઙ્ઘાતકા અમી ॥ ૩.૦૪॥

ન ત્વં નાહં ન ચાન્યદ્વા સર્વં બ્રહ્મૈવ કેવલમ્ ।
ન વાક્યં ન પદં વેદં નાક્ષરં ન જડં ક્વચિત્ ॥ ૩.૦૫॥

ન મધ્યં નાદિ નાન્તં વા ન સત્યં ન નિબન્ધનમ્ ।
ન દુઃખં ન સુખં ભાવં ન માયા પ્રકૃતિસ્તથા ॥ ૩.૦૬॥

ન દેહં ન મુખં ઘ્રાણં ન જિહ્વા ન ચ તાલુની ।
ન દન્તોષ્ઠૌ લલાટં ચ નિશ્વાસોચ્છ્વાસ એવ ચ ॥ ૩.૦૭॥

ન સ્વેદમસ્થિમાસં ચ ન રક્તં ન ચ મૂત્રકમ્ ।
ન દૂરં નાન્તિકં નાહં નોદરં ન કિરીટકમ્ ॥ ૩.૦૮॥

ન હસ્તપાદચલનં ન શાસ્ત્રં ન ચ શાસનમ્ ।
ન વેત્તા વેદનં વેદ્યં ન જાગ્રત્સ્વપ્નસુપ્તયઃ ॥ ૩.૦૯॥

તુર્યાતીતં ન મે કિઞ્ચિત્સર્વં સચ્ચિન્મયં તતમ્ ।
નાધ્યાત્મિકં નાધિભૂતં નાધિદૈવં ન માયિકમ્ ॥ ૩.૧૦॥

ન વિશ્વસ્તૈજસઃ પ્રાજ્ઞઃ વિરાટ્સૂત્રાત્મકેશ્વરાઃ ।
ન ગમાગમચેષ્ટા ચ ન નષ્ટં ન પ્રયોજનમ્ ॥ ૩.૧૧॥

ત્યાજ્યં ગ્રાહ્યં ન દૂષ્યં વા હ્યમેધ્યં મેધ્યકં તથા ।
ન પીનં ન કૃશં ક્લેદં ન કાલં દેશભાષણમ્ ॥ ૩.૧૨॥

ન સર્વં ન ભયં ચૈતન્ન વૃક્ષતૃણપર્વતાઃ ।
ન ધ્યાનં યોગસંસિદ્ધિર્નબ્રહ્મક્ષત્રવૈશ્યકમ્ ॥ ૩.૧૩॥

ન પક્ષી ન મૃગો નાગી ન લોભો મોહ એવ ચ ।
ન મદો ન ચ માત્સર્યં કામક્રોધાદયસ્તથા ॥ ૩.૧૪॥

ન સ્ત્રીશૂદ્રબિડાલાદિ ભક્ષ્યભોજ્યાદિકં ચ યત્ ।
ન પ્રૌઢહીનનાસ્તિક્યં ન વાર્તાવસરોઽસ્તિ હિ ॥ ૩.૧૫॥

ન લૌકિકો ન લોકો વા ન વ્યાપારો ન મૂઢતા ।
ન ભોક્તા ભોજનં ભોજ્યં માતૃમાનં ન મેયકમ્ ॥ ૩.૧૬॥

ન શત્રુમિત્રપુત્રાદિ ન માતા ન પિતા સ્વસા ।
ન જન્મ ન મૃતિર્વૃદ્ધિર્ન દેહોઽહમિતિ ભ્રમઃ ॥ ૩.૧૭॥

ન શૂન્યં નાપિ ચાશૂન્યં નાન્તઃકરણસંસ્મૃતિઃ ।
ન રાત્રિર્નદિવા નક્તં ન બ્રહ્મા ન હરિશ્શિવઃ ॥ ૩.૧૮॥

ન વારપક્ષમાસાદિ વત્સરં ન ચ ચઞ્ચલમ્ ।
ન બ્રહ્મલોકો વૈકુણ્ઠો ન કૈલાસો ન ચાન્યકઃ ॥ ૩.૧૯॥

ન સ્વર્ગો ન ચ દેવેન્દ્રો નાગ્નિલોકો ન ચાગ્નિકઃ ।
ન યમો ન યમલોકો વા ન લોકા લોકપાલકાઃ ॥ ૩.૨૦॥

ન ભૂર્ભુવસ્સ્વસ્ત્રૈલોક્યં ન પાતાળં ન ભૂતલમ્ ।
નાવિદ્યા ન ચ વિદ્યા ચ ન માયા પ્રકૃતિર્ન ચ ॥ ૩.૨૧॥

ન સ્થિરં ક્ષણિકં નાશો ન ગતિર્ન ચ ધાવનમ્ ।
ન ધ્યાતવ્યં ન મે સ્નાનં ન મન્ત્રો ન જપઃ ક્વચિત્ ॥ ૩.૨૨॥

ન પદાર્થં ન પૂજાર્હં નાભિષેકં ન ચાર્ચનમ્ ।
ન પુષ્પં ન ફલં પત્રં ગન્ધપુષ્પાદિધૂપકમ્ ॥ ૩.૨૩॥

ન સ્તોત્રં ન નમસ્કારો ન પ્રદક્ષિણમણ્વપિ ।
ન પ્રાર્થના પૃથગ્ભાવો ન હવિર્નાસ્તિ વન્દનમ્ ॥ ૩.૨૪॥

ન હોમો ન ચ કર્માણિ ન દુર્વાક્યં સુભાષણમ્ ।
ન ગાયત્રી ન વા સન્ધિર્ન મનસ્યં ન દુઃસ્થિતિઃ ॥ ૩.૨૫॥

ન દુરાશા ન દુષ્ટાત્મા ન ચણ્ડાલો ન પૌલ્કસઃ ।
ન દુસ્સહં દુરાલાપં ન કિરાતો ન કૈતવમ્ ॥ ૩.૨૬॥

ન પક્ષપાતં પક્ષં વા ન વિભૂષણતસ્કરૌ ।
ન ચ ડમ્ભો ડામ્ભિકો વા ન હીનો નાધિકો નરઃ ॥ ૩.૨૭॥

નૈકં દ્વયં ત્રયં તુર્યં ન મહત્વં ન ચાલ્પતા ।
ન પૂર્ણં ન પરિચ્છિન્નં ન કાશી ન વ્રતં તપઃ ॥ ૩.૨૮॥

ન ગોત્રં ન કુલં સૂત્રં ન વિભુત્વં ન શૂન્યતા ।
ન સ્ત્રીર્ન યોષિન્નો વૃદ્ધા ન કન્યા ન વિતન્તુકા ॥ ૩.૨૯॥

ન સૂતકં ન જાતં વા નાન્તર્મુખસુવિભ્રમઃ ।
ન મહાવાક્યમૈક્યં વા નાણિમાદિવિભૂતયઃ ॥ ૩.૩૦॥

એવં સલક્ષણં બ્રહ્મ વ્યતિરેકમુખેન વૈ ।
નિદાઘ ત્વં વિજાનીહિ બ્રહ્મેતરનિષેધતઃ ॥ ૩.૩૧॥

બ્રહ્મણઃ પ્રકૃતસ્યાત્ર દ્વિવિધં પ્રતિપાદનમ્ ।
અસન્નિષેધરૂપં સદ્વિધિરૂપં ચ તત્ર તુ ॥ ૩.૩૨॥

આત્મા નિષેધરૂપેણ તુભ્યં સમ્પ્રતિપાદિતઃ ।
અથાદ્ય વિધિરૂપેણ શ઼ૃણુ સમ્પ્રતિપાદ્યતે ॥ ૩.૩૩॥

સર્વં ચૈતન્યમાત્રત્વાત્સર્વદોષસ્સદા ન હિ ।
સર્વં સન્માત્રરૂપત્વાત્સચ્ચિદાનન્દરૂપકમ્ ॥ ૩.૩૪॥

બ્રહ્મૈવ સર્વં નાન્યોઽસ્મિ તદહં તદહં તથા ।
તદેવાહં તદેવાહં બ્રહ્મૈવાહં સનાતનમ્ ॥ ૩.૩૫॥

બ્રહ્મૈવાહં ન સંસારી બ્રહ્મૈવાહં ન મે મનઃ ।
બ્રહ્મૈવાહં ન મે સિદ્ધિર્બ્રહ્મૈવાહં ન ચેન્દ્રિયમ્ ॥ ૩.૩૬॥

બ્રહ્મૈવાહં ન દેહોઽહં બ્રહ્મૈવાહં ન ગોચરઃ ।
બ્રહ્મૈવાહં ન જીવોઽહં બ્રહ્મૈવાહં ન ભેદભૂઃ ॥ ૩.૩૭॥

બ્રહ્મૈવાહં જડો નાહમહં બ્રહ્મ ન મે મૃતિઃ ।
બ્રહ્મૈવાહં ન ચ પ્રાણો બ્રહ્મૈવાહં પરાત્પરમ્ ॥ ૩.૩૮॥

ઇદં બ્રહ્મ પરં બ્રહ્મ સત્યં બ્રહ્મ પ્રભુર્હિ સઃ ।
કાલો બ્રહ્મ કલા બ્રહ્મ સુખં બ્રહ્મ સ્વયમ્પ્રભમ્ ॥ ૩.૩૯॥

એકં બ્રહ્મ દ્વયં બ્રહ્મ મોહો બ્રહ્મ શમાદિકમ્ ।
દોષો બ્રહ્મ ગુણો બ્રહ્મ દિશશ્શાન્તિર્વિભુઃ પ્રભુઃ ॥ ૩.૪૦॥

લોકા બ્રહ્મ ગુરુર્બ્રહ્મ શિષ્યો બ્રહ્મ સદાશિવઃ ।
પૂર્વં બ્રહ્મ પરં બ્રહ્મ શુદ્ધં બ્રહ્મ શુભાશુભમ્ ॥ ૩.૪૧॥

જીવ એવ સદા બ્રહ્મ સચ્ચિદાનન્દમસ્મ્યહમ્ ।
સર્વં બ્રહ્મમયં પ્રોક્તં સર્વં બ્રહ્મમયં જગત્ ॥ ૩.૪૨॥

સ્વયં બ્રહ્મ ન સન્દેહઃ સ્વસ્માદન્યન્ન કિઞ્ચન ।

સર્વમાત્મૈવ શુદ્ધાત્મા સર્વં ચિન્માત્રમવ્યયમ્ ॥ ૩.૪૩॥

નિત્યનિર્મલરૂપાત્મા હ્યાત્મનોન્યન્ન કિઞ્ચન ।
અણુમાત્રલસદ્રૂપમણુમાત્રમિદં જગત્ ॥ ૩.૪૪॥

અણુમાત્રં શરીરં વા હ્યણુમાત્રમસત્યકમ્ ।
અણુમાત્રં મનશ્ચિત્તમણુમત્રાપ્યહઙ્કૃતિઃ ॥ ૩.૪૫॥

અણુમાત્રા ચ બુદ્ધિશ્ચ હ્યણુમાત્રોઽપિ જીવકમ્ ।
અણુમાત્રમિદં ચિત્તં સર્વમપ્યણુમાત્રકમ્ ॥ ૩.૪૬॥

બ્રહ્મૈવ સર્વં ચિન્માત્રં બ્રહ્મમાત્રં જગત્ત્રયમ્ ।
આનન્દં પરમાનન્દમન્યત્કિઞ્ચિન્ન કિઞ્ચન ॥ ૩.૪૭॥

ચૈતન્યમાત્રમોઙ્કારં બ્રહ્મૈવ ભવતિ સ્વયમ્ ।
અહમેવ જગત્સર્વમહમેવ પરમ્પદમ્ ॥ ૩.૪૮॥

અહમેવ ગુણાતીતોઽસ્મ્યહમેવ પરાત્પરઃ ।
અહમેવ પરમ્બ્રહ્મ હ્યહમેવ ગુરોર્ગુરુઃ ॥ ૩.૪૯॥

અહમેવાખિલાધારોઽસ્મ્યહમેવ સુખાત્સુખમ્ ।
આત્મનોઽન્યજ્જગન્નાસ્તિ હ્યાત્મનોઽન્યત્સુખં ન ચ ॥ ૩.૫૦॥

આત્મનોઽન્યા ગતિર્નાસ્તિ સર્વમાત્મમયં જગત્ ।
આત્મનોઽન્યન્ન હિ ક્વાપિ આત્મનોઽન્યત્તૃણં ન હિ ॥ ૩.૫૧॥

આત્મનોઽન્યત્તુષં નાસ્તિ સર્વમાત્મમયં જગત્ ।
બ્રહ્મમાત્રમિદં સર્વં બ્રહ્મમાત્રમસન્ન હિ ॥ ૩.૫૨॥

બ્રહ્મમાત્રમિદં સર્વં સ્વયં બ્રહ્મૈવ કેવલમ્ ।
બ્રહ્મમાત્રં વ્રતં સર્વં બ્રહ્મમાત્રં રસં સુખમ્ ॥ ૩.૫૩॥

બ્રહ્મમાત્રં ચિદાકાશં સચ્ચિદાનન્દમદ્વયમ્ ।
બ્રહ્મણોઽન્યતરં નાસ્તિ બ્રહ્મણોઽન્યન્ન કિઞ્ચન ॥ ૩.૫૪॥

બ્રહ્મણોઽન્યદહં નાસ્તિ બ્રહ્મણોઽન્યત્ફલં ન હિ ।
બ્રહ્મણોઽન્યત્પદં નાસ્તિ બ્રહ્મણોઽન્યત્પદં ન હિ ॥ ૩.૫૫॥

બ્રહ્મણોઽન્યદ્ગુરુર્નાસ્તિ બ્રહ્મણોઽન્યદસદ્વપુઃ ।
બ્રહ્મણોઽન્યન્નચાહન્તા ત્વત્તેદં તેન હિ ક્વચિત્ ॥ ૩.૫૬॥

સ્વયં બ્રહ્માત્મકં વિદ્ધિ સ્વસ્માદન્યન્નકિઞ્ચન ।
યત્કિઞ્ચિદ્દૃશ્યતે લોકે યત્કિઞ્ચિદ્ભાષ્યતે જનૈઃ ॥ ૩.૫૭॥

યત્કિઞ્ચિત્ક્રિયતે નિત્યં યત્કિઞ્ચિદ્ગમ્યતે જનૈઃ ।
યત્કિઞ્ચિદ્ભુજ્યતે ક્વાપિ તત્સર્વમસદેવ હિ ॥ ૩.૫૮॥

કર્તૃભેદં ક્રિયાભેદં ગુણભેદં રસાદિકમ્ ।
લિઙ્ગભેદમિદં સર્વમસદેવ સદા સુખમ્ ॥ ૩.૫૯॥

કાલભેદં દેશભેદં વસ્તુભેદં જયાજયમ્ ।
યદ્યદ્ભેદં ચ તત્સર્વમસદેવ હિ કેવલમ્ ॥ ૩.૬૦॥

અસદન્તઃકરણમસદેવેન્દ્રિયાદિકમ્ ।
અસત્પ્રાણાદિકં સર્વં સઙ્ઘાતમસદાત્મકમ્ ॥ ૩.૬૧॥

અસત્યં પઞ્ચકોશાખ્યમસત્યાઃ પઞ્ચદેવતાઃ ।
અસત્યં ષડ્વિકારાદિ હ્યસત્યમરિવર્ગકમ્ ॥ ૩.૬૨॥

અસત્યષ્ષડૃતુશ્ચૈવ હ્યસત્યષ્ષડ્રસસ્સદા ।
સપ્તર્ષયોપ્યસત્યાસ્તેપ્યસત્યાસ્સપ્તસાગરાઃ ॥ ૩.૬૩॥

સચ્ચિદાનન્દમાત્રોઽહમનુત્પન્નમિદં જગત્ ।
આત્મૈવાહં પરંસત્યો નાન્યાસ્સંસારદૃષ્ટયઃ ॥ ૩.૬૪॥

સત્યમાનન્દરૂપોઽહં ચિદ્ઘનાનન્દવિગ્રહઃ ।
અહમેવ પરાનન્દોઽસ્મ્યહમેવ પરાત્પરઃ ॥ ૩.૬૫॥

જ્ઞાનાકારમિદં સર્વં જ્ઞાનાનન્દોહમદ્વયઃ ।
જ્ઞાનપ્રકાશરૂપોહં જ્ઞાનાનન્દૈકવિગ્રહઃ ॥ ૩.૬૬॥

યેન જ્ઞાતમિદં જ્ઞાનમજ્ઞાનધ્વાન્તનાશકઃ ।
જ્ઞાનેનાજ્ઞાનનાશેન સ હિ જ્ઞાની સમીર્યતે ॥ ૩.૬૭॥

જ્ઞાનં યથા દ્વિધા પ્રોક્તં સ્વરૂપં વૃત્તિરિત્યપિ ।
અજ્ઞાનં ચ તથા વિદ્ધિ મૂલં ચ પ્રતિબન્ધકમ્ ॥ ૩.૬૮॥

યથા જ્ઞાનં વિના લોકે કિઞ્ચિદેવ ન સિદ્ધ્યતિ ।
તથા જ્ઞાનં વિના લોકે ક્વચિન્મુક્તિર્ન સિદ્ધ્યતિ ॥ ૩.૬૯॥

જ્ઞાનદ્વયં તથાઽજ્ઞાનદ્વયમપ્યત્ર વર્ષ્મણિ ।
સર્વદા ભાન્તિ જીવાનં જ્ઞાનાજ્ઞાનોક્તિદર્શનાત્ ॥ ૩.૭૦॥

જ્ઞાનસ્ય ક્વ તિરોભાવો જ્ઞાનસ્યાવિર્ભવસ્તથા ।
દૃષ્ટસ્સર્વત્ર લોકેઽસ્મિન્ દુર્લભો હિ વિપર્યયઃ ॥ ૩.૭૧॥

જ્ઞાનં સર્વાન્તરં ભાતિ કૂટસ્થાત્મસ્વરૂપકમ્ ।
પ્રજ્ઞામાત્રમિદં સૂક્ષ્મં કોઽપિ જાનાતિ પુણ્યકૃત્ ॥ ૩.૭૨॥

પ્રજ્ઞાયાં કલ્પિતાં પ્રજ્ઞાં પ્રજ્ઞયૈવ વિહાય યઃ ।
પ્રજ્ઞામાત્રેણ સન્તિષ્ટેત્ સ પ્રજ્ઞાવાનિતીર્યતે ॥ ૩.૭૩॥

બહિઃપ્રજ્ઞાં સદોત્સૃજ્યાપ્યન્તઃપ્રજ્ઞાં ચ યો બુધઃ ।
કયાપિ પ્રજ્ઞયોપેતઃ પ્રજ્ઞાવાનિતિ કથ્યતે ॥ ૩.૭૪॥

પ્રજ્ઞૈવ યસ્ય નેત્રં સ્યાત્ પ્રજ્ઞૈવ શ્રોત્રમિન્દ્રિયમ્ ।
અન્યચ્ચ સર્વં પ્રજ્ઞૈવ સ પ્રાજ્ઞઃ પુરુષોત્તમઃ ॥ ૩.૭૫॥

પ્રજ્ઞયા જાયતે સર્વં પ્રજ્ઞયા પાલ્યતેઽખિલમ્ ।
પ્રજ્ઞયા ક્ષીયતે સર્વં તસ્માત્પ્રજ્ઞાં સમાશ્રય ॥ ૩.૭૬॥

પ્રજ્ઞાહીનમસત્સર્વં પ્રજ્ઞાહીનં જડં ખલુ ।
પ્રજ્ઞાહીનં સદા દુઃખં તસ્માત્પ્રજ્ઞાં સમાશ્રય ॥ ૩.૭૭॥

ન વિના પ્રજ્ઞયા પુણ્યં ન લોકઃ પ્રજ્ઞયા વિના ।
વિના ન પ્રજ્ઞયાઽભીષ્ટં તસ્માત્પ્રજ્ઞાં સમાશ્રય ॥ ૩.૭૮॥

સુસૂક્ષ્મયા ધિયા પ્રજ્ઞામિમાં તાં જ્ઞપ્તિસંજ્ઞિકામ્ ।
જ્ઞાત્વા ભવભવાન્મુક્તો નિર્ગુણબ્રહ્મરૂપિણીમ્ ॥ ૩.૭૯॥

જાગ્રદાદ્યાસ્વવસ્થાસુ યા જ્ઞપ્તિસ્ત્રિસૃષુ સ્વયમ્ ।
આભાસતોઽપ્યનુસ્યૂતા જ્ઞપ્તિસ્સા નિર્મલા સ્વતઃ ॥ ૩.૮૦॥

જ્ઞપ્તિસ્સા સાક્ષિણી નિત્યા તુર્યા સર્વશ્રુતીરિતા ।
વિષયજ્ઞપ્તિસન્ત્યાગાત્ જ્ઞાયતે વિબુધૈસ્સ્વતઃ ॥ ૩.૮૧॥

જ્ઞપ્તિરેવ પરમ્બ્રહ્મ જ્ઞપ્તિરેવ પરં પદમ્ ।
જ્ઞપ્તિરેવ પરો મોક્ષો જ્ઞપ્તિરેવ પરં સુખમ્ ॥ ૩.૮૨॥

જ્ઞપ્તિરેવ પરાચાર્યો જ્ઞપ્તિરેવ પરામૃતમ્ ।
જ્ઞપ્તિરેવ પરાતૃપ્તિર્જ્ઞપ્તિરેવ પરાગતિઃ ॥ ૩.૮૩॥

તસ્માજ્જ્ઞપ્તિં સમાશ્રિત્ય વિજ્ઞપ્તિધિષણાં ત્યજ ।

અજ્ઞપ્તેર્દુઃખહેતુત્વાત્સુખાર્થી જ્ઞપ્તિમાશ્રય ॥ ૩.૮૪॥

અજ્ઞપ્તિવિષયો જીવઃ કૂટસ્થો જ્ઞપ્તિગોચરઃ ।
હેયોપાદેયતા સિદ્ધા ધર્માધર્મિત્વતસ્તયોઃ ॥ ૩.૮૫॥

અહમ્પ્રત્યયશબ્દાભ્યાં વિજ્ઞેયો જીવસંજ્ઞકઃ ।
અસ્મત્પ્રત્યયશબ્દાભ્યાં જ્ઞેયો કૂટસ્થસંજ્ઞકઃ ॥ ૩.૮૬॥

યદહં પ્રત્યયી જીવસ્તદ્યુષ્મત્પ્રત્યયી ચ સઃ ।
ત્વમહં શબ્દયોરૈક્યાત્તત્સાક્ષી પ્રત્યગાહ્વયઃ ॥ ૩.૮૭॥

અસ્મત્પ્રત્યયિનં સાક્ષિચૈતન્યાત્મકમદ્વયમ્ ।
કૂટસ્થં પ્રત્યગાત્માનં સાક્ષાદ્વિષયિણં પરમ્ ॥ ૩.૮૮॥

જહિ જ્ઞાત્વા તદન્યં ત્વમહમ્પ્રત્યયિનં બહિઃ ।
સાક્ષ્યં જીવં ચિદાભાસં પરાઞ્ચં વિષયં સ્વતઃ ॥ ૩.૮૯॥

દૃગ્દૃશ્યભૂતયોરત્ર જીવાત્મપ્રત્યગાત્મનોઃ ।
વિવેકેન પરં સૌખ્યં નિદાઘ વ્રજ સન્તતમ્ ॥ ૩.૯૦॥

॥ ઇતિ શ્રી ગુરુજ્ઞાનવાસિષ્ઠે તત્ત્વનારાયણે
જ્ઞાનકાણ્ડસ્ય પ્રથમપાદે પઞ્ચમોઽધ્યાયઃ એવં
શ્રી ઋભુગીતા તૃતીયોઽધ્યાયઃ સમાપ્તઃ ॥

## ચતુર્થોઽધ્યાયઃ

પુનર્જ્ઞાનં પ્રવક્ષ્યામિ જાગ્રદાદિ વિલક્ષણમ્ ।
તુરીયબ્રહ્મરૂપં તદ્યજ્જ્ઞાત્વા મોક્ષ્યસેઽશુભાત્ ॥ ૪.૦૧॥

ઊર્ણનાભિર્યથા તન્તૂન્ સૃજતે સંહરત્યપિ ।
જાગ્રત્સ્વપ્ને તથા જીવો ગચ્છત્યાગચ્છતે પુનઃ ॥ ૪.૦૨॥

નેત્રે જાગરિતં વિદ્યાત્કણ્ઠે સ્વપ્નં સમાવિશેત્ ।
સુષુપ્તં હૃદયસ્થં તુ તુરીયં મૂર્ધ્નિ સંસ્થિતમ્ ॥ ૪.૦૩॥

યતો વચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
આનન્દમેતજ્જીવસ્ય યજ્જ્ઞાત્વા મુચ્યતે બુધઃ ॥ ૪.૦૪॥

સર્વવ્યાપિનમાત્માનં ક્ષીરે સર્પિરિવાર્પિતમ્ ।
આત્મવિદ્યા તપોમૂલં તદ્બ્રહ્મોપનિષત્પદમ્ ॥ ૪.૦૫॥

શ્રી ગુરુમૂર્તિઃ ।
ઋભુણોક્તમિદં શ્રુત્વા નિદાઘસ્સંશયાકુલઃ ।
પપ્રચ્છ સદ્ગુરું શાન્તં સાવધાનેન ચેતસા ॥ ૪.૦૬॥

નિદાઘઃ ।
ભગવન્ ભવતા પૂર્વં યતો વાચ ઇતિ શ્રુતેઃ ।
આનન્દો બ્રહ્મણઃ પ્રોક્તો જીવસ્ય ત્વધુનોચ્યતે ॥ ૪.૦૭॥

આનન્દમયસંજ્ઞસ્ય જીવસ્યોક્તશ્ચ યદ્યપિ ।
શ્રુતૌ તથાપિ હેયત્વાન્ન તદીયો ભવેદ્ધિ સઃ ॥ ૪.૦૮॥

નાવાઙ્મનસગમ્યત્વં જીવસ્ય ખલુ યુજ્યતે ।
નાનન્દસ્ય ચ વેદ્યત્વવચનાદ્બ્રહ્મણો હિ તત્ ॥ ૪.૦૯॥

એવં પૃષ્ટો મુનિશ્રેષ્ઠો નિદાઘેન મહાત્મના ।
ઋભુઃ પ્રોવાચ સર્વજ્ઞો બ્રહ્મન્ સસ્મિતમાદરાત્ ॥ ૪.૧૦॥

બ્રહ્મોક્તં જીવશબ્દેન હ્યવાઙ્મનસગોચરમ્ ।
મોક્ષાતીતદશાયાં યજ્જીવસ્તદ્બ્રહ્મતાં વ્રજેત્ ॥ ૪.૧૧॥

પૂર્વોત્તરવિરોધો વા મદ્વાક્યેષુ ન તદ્ભવેત્ ।
શ્રુત્યર્થસ્યોપરોધો વા સમ્યગાલોચ્ય નિશ્ચિનુ ॥ ૪.૧૨॥

ઉપસઙ્ક્રમિતવ્યો યદાનન્દમય ઉચ્યતે ।
વેદ્યત્વં તસ્ય ચાસિદ્ધં પુચ્છસ્યાવિષયત્વતઃ ॥ ૪.૧૩॥

તસ્માત્સ્વયં સદાપૂર્ણઃ પઞ્ચમસ્ય વિકારિણઃ ।
આત્મસ્થાનીય આનન્દ ઇહ વેદ્ય ઇતિ સ્થિતિઃ ॥ ૪.૧૪॥

ભૃગવે વરુણેનૈવં તૈત્તિરીયાભિદશ્રુતૌ ।
પઞ્ચમસ્ય વિકારિત્વં ન પ્રોક્તમિતિ ચેચ્છૃણુ ॥ ૪.૧૫॥

મયટ્પ્રયોગાભાવેન હેતુના નિર્વિકારતા ।
ન શઙ્ક્યા પૂર્વપર્યાયેષ્વન્નાદિષ્વપ્યદર્શનાત્ ॥ ૪.૧૬॥

અતષ્ષષ્ઠં પરમ્બ્રહ્મ પઞ્ચમેનોપલક્ષિતમ્ ।
નિર્ગુણં ભૃગવે પિત્રા પ્રોક્તમિત્યવધારય ॥ ૪.૧૭॥

પ્રાચુર્યાર્થકતાયાં તુ  મયટો નિર્વિકારિણઃ ।

સચ્ચિદાનન્દરૂપસ્ય બ્રહ્મણો વેદ્યતા ભવેત્ ॥ ૪.૧૮॥

શારીરત્વાભિધાનેન પૂર્વાનન્દમયસ્ય તુ ।
વિકારિત્વં પુનસ્સ્પષ્ટમુપસઙ્ક્રમણેન ચ ॥ ૪.૧૯॥

નાનુકર્ષશ્ચ પુચ્છસ્ય પૂર્વપૂર્વસ્ય દૃશ્યતે ।
ઉત્તરોત્તરકોશે પ્રાક્તત્તદાત્માનુકર્ષણાત્ ॥ ૪.૨૦॥

ઉપસઙ્ક્રમણં ચોક્તં મયડન્તસ્ય કેવલમ્ ।
આનન્દસ્ય તતોઽન્યસ્ય ન પરાત્મતયા ખલુ ॥ ૪.૨૧॥

બ્રહ્મવિત્પરમાપ્નોતીત્યાદૌ દ્વૈવિધ્યમીરિતમ્ ।
યત્તત્સરૂપારૂપાભ્યાં બ્રહ્મણોઽન્તે ચ નિશ્ચિનુ ॥ ૪.૨૨॥

આત્મસ્થાનીયચિદ્રૂપાનન્દબ્રહ્મવિદો મુને ।
પ્રારબ્ધાન્તે પુચ્છભૂતાઽરૂપબ્રહ્માપ્તિરિષ્યતે ॥ ૪.૨૩॥

પ્રતિષ્ઠાશબ્દગમ્યત્વાત્સર્વશેષિત્વતોઽપિ ચ ।
શાસ્ત્રસ્યારૂપવદ્બ્રહ્મપ્રાધાન્યં યદ્યપિ સ્થિતમ્ ॥ ૪.૨૪॥

તથાપિ વેદ્યતાઽભાવાદરૂપસ્ય મુમુક્ષુભિઃ ।
આનન્દરૂપવદ્બ્રહ્મપ્રાધાન્યં મુખ્યમિષ્યતે ॥ ૪.૨૫॥

મોદપ્રમોદયોશ્ચૈવં સતિ વેદ્યત્વમાપતેત્ ।
ઇતિ ચેન્નૈષ દોષોઽસ્તિ તયોર્બ્રહ્માંશતા યતઃ ॥ ૪.૨૬॥

બ્રહ્મણસ્સ્વગતે ભેદે નિત્યસિદ્ધે મુમુક્ષુવઃ ।
ઉપેક્ષિતું સમર્થા સ્સ્યુર્નિદાઘ કથમત્ર તે ॥ ૪.૨૭॥

સ્થૂલાર્થદર્શિનો યે વૈ શુષ્કાદ્વૈતસમાશ્રયાઃ ।
તેષાં સાવયવત્વાદિ દોષસ્સ્ફુરતુ ચેતસિ ॥ ૪.૨૮॥

ન તાવતા ત્રિપાચ્છ્રુત્યાદ્યનુરોધેન નિશ્ચિતમ્ ।
સ્વભેદં વિદુષાં કિઞ્ચિચ્છિદ્યતે મુક્તજન્મનામ્ ॥ ૪.૨૯॥

સૂક્ષ્મબુદ્ધ્યા વિચરે હિ સ્વાત્મભેદઃ પ્રકાશતે ।
અત્યન્તાભેદવાર્તાયાં પુચ્છગાયાં ફલં કિમુ ॥ ૪.૩૦॥

એતે કોશા હિ પઞ્ચૈવ તિસ્રોઽવસ્થાસ્સમીરિતાઃ ।
જાગ્રદાદ્યાઃ ક્રમેણૈતદ્ભેદં ચ શ ૃણુ સાદરમ્ ॥ ૪.૩૧॥

આદ્યા જાગરિતાઽવસ્થા દ્વિતીયા સ્વપ્નસંજ્ઞિકા ।
તૃતીયા સુપ્તિરૂપાન્યા તુરીયા ચિત્સુખાત્મિકા ॥ ૪.૩૨॥

આદ્યાભિમાની વિશ્વાખ્યો દ્વિતીયસ્તૈજસસ્સ્મૃતઃ ।
તૃતીયઃ પ્રાજ્ઞ એતેભ્યો કૂટસ્થ ઇતરઃ પ્રભુઃ ॥ ૪.૩૩॥

બહિઃપ્રજ્ઞો વિભુર્વિશ્વો હ્યન્તઃપ્રજ્ઞસ્તુ તૈજસઃ ।
ઘનપ્રજ્ઞસ્તથા પ્રાજ્ઞ એક એવ ત્રિધા સ્થિતઃ ॥ ૪.૩૪॥

દક્ષિણાક્ષિમુખે વિશ્વો મનસ્યતન્તસ્તુ તૈજસઃ ।
આકાશે ચ હૃદિ પ્રાજ્ઞસ્ત્રિધા દેહે વ્યવસ્થિતઃ ॥ ૪.૩૫॥

વિશ્વો હિ સ્થૂલભુઙ્નિત્યં તૈજસઃ પ્રવિવિક્તભુક્ ।
આનન્દભુક્તથા પ્રાજ્ઞસ્ત્રિધા ભોગં નિબોધ ચ ॥ ૪.૩૬॥

સ્થૂલં તર્પયતે વિશ્વં પ્રવિવિક્તં તુ તૈજસમ્ ।
આનન્દશ્ચ તથા પ્રાજ્ઞં ત્રિધા તૃપ્તિં નિબોધ ચ ॥ ૪.૩૭॥

ત્રિષુ ધામસુ યદ્ભોજ્યં ભોક્તા યશ્ચ પ્રકીર્તિતઃ ।
વેદૈતદુભયં યસ્તુ સ ભુઞ્જાનો ન લિપ્યતે ॥ ૪.૩૮॥

પ્રભવસ્સર્વભાવાનાં સતામિતિ વિનિશ્ચયઃ ।
સર્વં જનયતિ પ્રાણશ્ચેતોંઽશૂન્પુરુષઃ પૃથક્ ॥ ૪.૩૯॥

વિભૂતિં પ્રસવન્ત્વન્યે મન્યન્તે સૃષ્ટિચિન્તકાઃ ।
સ્વપ્નમાયાસ્વરૂપેતિ સૃષ્ટિરન્યૈર્વિકલ્પિતા ॥ ૪.૪૦॥

ઇચ્છામાત્રં પ્રભોસ્સૃષ્ટિરિતિ સૃષ્ટૌ વિનિશ્ચિતાઃ ।
કાલાત્પ્રસૂતિં ભૂતાનાં મન્યન્તે કાલચિન્તકાઃ ॥ ૪.૪૧॥

ભોગાર્થં સૃષ્ટિરિત્યન્યે ક્રીડાર્થમિતિ ચાપરે ।
દેવસ્યૈષ સ્વભાવોઽયમાપ્તકામસ્ય કા સ્પૃહા ॥ ૪.૪૨॥

આપ્તકામસ્ય દેવસ્ય તુર્યસ્યોક્તસ્ય સુવ્રત ।
સ્વરૂપં પ્રોચ્યતે સમ્યઙ્નિદાઘ શૃણુ તત્ત્વતઃ ॥ ૪.૪૩॥

નાન્તઃપ્રજ્ઞં બહિઃપ્રજ્ઞં ન પ્રજ્ઞં નોભયાત્મકમ્ ।
ન પ્રજ્ઞાનઘનં પ્રજ્ઞં  નાપ્રજ્ઞં ન ચ કેવલમ્ ॥ ૪.૪૪॥

ઇદન્ત્વે ન તદ્ગ્રાહ્યમદૃશ્યં ચાપ્યલક્ષણમ્ ।
અચિન્ત્યાવ્યવહાર્યં ચાવ્યપદેશં પૃથક્તયા ॥ ૪.૪૫॥

એકાત્મપ્રત્યયં સારં પ્રપઞ્ચોપશમં શિવમ્ ।
શાન્તં ચતુર્થમદ્વૈતં મન્યન્તે બ્રહ્મવાદિનઃ ॥ ૪.૪૬॥

સ આત્મા સ હિ વિજ્ઞેયઃ સર્વૈરપિ મુમુક્ષુભિઃ ।
તુર્યાત્મજ્ઞાનહીનાનાં ન મુક્તિસ્સ્યાત્કદાચન ॥ ૪.૪૭॥

નિવૃત્તેસ્સર્વદુઃખાનામીશાનઃ પ્રભુરવ્યયઃ ।
અદ્વૈતસ્સર્વભાવાનાં દેવસ્તુર્યો વિભુસ્સ્મૃતઃ ॥ ૪.૪૮॥

કાર્યકારણબદ્ધૌ તાવિષ્યેતે વિશ્વતૈજસૌ ।
પ્રાજ્ઞઃ કારણબદ્ધસ્તુ દ્વૌ તૌ તુર્યે ન સિદ્ધ્યતઃ ॥ ૪.૪૯॥

નાત્માનં ન પરં ચૈવ ન સત્યં નાપિ ચાનૃતમ્ ।
પ્રાજ્ઞઃ કિઞ્ચ ન સંવેત્તિ  તુર્યં તત્સર્વદૃક્સદા ॥ ૪.૫૦॥

દ્વૈતસ્યાગ્રહણં તુલ્યમુભયોઃ પ્રાજ્ઞતુર્યયોઃ ।
બીજનિદ્રાયુતઃ પ્રાજ્ઞસ્સા ચ તુર્યે ન વિદ્યતે ॥ ૪.૫૧॥

સ્વપ્નનિદ્રાયુતાવાદ્યૌ પ્રાજ્ઞસ્ત્વસ્વપ્નનિદ્રયા ।
ન નિદ્રાં નૈવ ચ સ્વપ્નં તુર્યે પશ્યન્તિ નિશ્ચિતાઃ ॥ ૪.૫૨॥

અન્યથા ગૃહ્ણતસ્સ્વપ્નો નિદ્રાતત્ત્વમજાનતઃ ।
વિપર્યાસે તયોઃ ક્ષીણે તુરીયં પદમશ્નુતે ॥ ૪.૫૩॥

અનાદિમાયયા સુપ્તો યદા જીવઃ પ્રબુધ્યતે ।
અજમદ્વૈતમસ્વપ્નમનિદ્રં બુધ્યતે તદા ॥ ૪.૫૪॥

પ્રપઞ્ચો યદિ વિદ્યેત નિવર્તેત ન સંશયઃ ।
માયામાત્રમિદં દ્વૈતમદ્વૈતં પરમાર્થતઃ ॥ ૪.૫૫॥

વિકલ્પો વિનિવર્તેત કલ્પિતો યદિ કેનચિત્ ।
ઉપદેશાદયં વાદો જ્ઞાતે દ્વૈતં ન વિદ્યતે ॥ ૪.૫૬॥

નિદાઘઃ ।

ભગવન્ કથમદ્વૈતં બ્રહ્મદ્વૈવિધ્યવાદિનઃ ।
ભવતોઽભિમતં તત્ર સંશયો મે ભવત્યલમ્ ॥ ૪.૫૭॥

ઋભુઃ ।

દ્વૈતપ્રપઞ્ચશૂન્યેઽસ્મિન્ નિર્ગુણે પૂર્ણચિદ્ઘને ।

બ્રહ્મણ્યદ્વૈતસંસિદ્ધિર્યતો નાન્યત્ર સર્વધા ॥ ૪.૫૮॥

અતસ્સરૂપારૂપાભ્યાં બ્રહ્મદ્વૈવિધ્યવાદિનઃ ।
મમૈવાદ્વૈતવાદિત્વન્નારૂપાદ્વૈતવાદિનઃ ॥ ૪.૫૯॥

દ્વૈતાદ્વૈતોભયાતીતે વ્યવહારાદ્યગોચરે ।
નીરૂપે બ્રહ્મણિ પ્રાજ્ઞાદ્વૈતવાદઃ કથં ભવેત્ ॥ ૪.૬૦॥

દ્વૈતાચિદ્રૂપકાર્યસ્યાદ્વૈતચિદ્રૂપકારણાત્ ।
નિવૃત્તિસ્સ્યાદ્યથા દીપાત્તમસો નત્વરૂપતઃ ॥ ૪.૬૧॥

અતો નાદ્વૈતસિદ્ધિસ્સ્યાત્કથઞ્ચિદપિ સત્તમ ।
અરૂપાગોચરબ્રહ્મવાદિનાં તાદૃશે મતે ॥ ૪.૬૨॥

ચિદ્રૂપબ્રહ્મતાદાત્મ્યં જીવસ્ય હિ વિવક્ષિતમ્ ।
નારૂપવાક્યદૂરત્વાત્તન્નાદ્વૈતમરૂપિણામ્ ॥ ૪.૬૩॥

યદ્યપ્યરૂપબ્રહ્મત્વં જીવસ્યાન્તે પ્રસિદ્ધ્યતિ ।
તથાપ્યદ્વૈતતાં વક્તું ન શક્યં દ્વન્દ્વહાનિતઃ ॥ ૪.૬૪॥

વાચ્યવાચકહીને ચ લક્ષ્યલક્ષણવર્જિતે ।
કથમદ્વૈતશબ્દોઽયં સાવકાશો ભવેન્મુને ॥ ૪.૬૫॥

નિદાઘઃ ।
દેવતાપુરુષાદ્યૈર્હિ વેદશબ્દૈસ્સમીર્યતે ।
તસ્યૌપનિષદત્વસ્યાવ્યભિચરોઽસ્ત્યરૂપિણઃ ॥ ૪.૬૬॥

તતોઽસ્ય શબ્દગમ્યત્વાત્ પ્રષ્ટવ્યત્વં મયા ભવેત્ ।
વાચ્યત્વં ચ ત્વયેત્યદ્ય મન્યે શ્રીગુરુનાયક ॥ ૪.૬૭॥

ઋભુઃ ।
અરૂપબ્રહ્મવિષયાશ્શબ્દાસ્સન્ત્યેવ યદ્યપિ ।
તેનૌપનિષદત્વં ચ કથઞ્ચિત્તસ્ય સિદ્ધ્યતિ ॥ ૪.૬૮॥

તથાપિ પ્રશ્નયોગ્યત્વં વાચ્યત્વં વા ન સિદ્ધ્યતિ ।
રૂઢ્યર્થમાત્રવત્ત્વેનાલક્ષકત્વાદયોગતઃ ॥ ૪.૬૯॥

યોગાર્થવદ્ભિશ્શબ્દૈર્હિ લક્ષકૈર્વાચકૈશ્ચ વા ।
શિષ્યેભ્યઃ પ્રોચ્યતે સત્યંવસ્તુ શ્રીગુરુમૂર્તિભિઃ ॥ ૪.૭૦॥

અરૂપવસ્તુનઃ પ્રશ્નઃ પ્રતિષિદ્ધશ્શ્રુતૌ યતઃ ।

યાજ્ઞવલ્ક્યેન ગાર્ગ્યૈ તન્નત્વં પ્રષ્ટુમિહાર્હસિ ॥ ૪.૭૧॥

તસ્માત્ તુરીયં સદ્બ્રહ્મ યોગવૃત્ત્યૈવ લક્ષણૈઃ ।
સચ્ચિદાનન્દપૂર્વૈસ્ત્વં મદુક્તં વિદ્ધિ મુક્તયે ॥ ૪.૭૨॥

જાગ્રત્યન્નમયં કોશં સ્થૂલદેહં ચ વિદ્ધિ વૈ ।
સ્વપ્ને પ્રાણમનોજ્ઞાનમયાસ્સૂક્ષ્મવપુસ્તતઃ ॥ ૪.૭૩॥

સુષુપ્તૌ કારણં દેહમાનન્દમયકોશકમ્ ।
તુરીયે ત્વશરીરં તચ્ચિદ્રૂપં કોશવર્જિતમ્ ॥ ૪.૭૪॥

સ એવ માયાપરિમોહિતાત્મા શરીરમાસ્થાય કરોતિ સર્વમ્ ।
યઃ સ્ત્ર્યન્નપાનાદિ વિચિત્રભોગૈસ્સ એવ જાગ્રત્પરિતૃપ્તિમેતિ ॥ ૪.૭૫॥

સ્વપ્નેઽપિ જીવસ્સુખદુઃખભોક્તા સ્વમાયયા કલ્પિતવિશ્વલોકે ।
સુષુપ્તિકાલે સકલે વિલીને તમોઽભિભૂતસ્સુખરૂપમેતિ ॥ ૪.૭૬॥

પુનશ્ચ જન્માન્તરકર્મયોગાત્સ એવ જીવસ્સ્વપિતિ પ્રબુદ્ધઃ ।
પુરત્રયે ક્રીડતિ યસ્તુ જીવસ્તતસ્તુ જાતં સકલં વિચિત્રમ્ ॥ ૪.૭૭॥

આધારમાનન્દમખણ્ડબોધં યસ્મિન્ લયં યાતિ પુરત્રયં ચ ।
યત્સર્વવેદાન્તરહસ્યતત્ત્વં યત્પૂર્ણચૈતન્યનિજસ્વરૂપમ્ ॥ ૪.૭૮॥

એતસ્માજ્જાયતે પ્રાણો મનસ્સર્વેન્દ્રિયાણિ ચ ।
ખં વાયુર્જ્યોતિરાપશ્ચ પૃથ્વી સર્વસ્ય ધારિણી ॥ ૪.૭૯॥

યત્પરમ્બ્રહ્મ સર્વાત્મા વિશ્વસ્યાયતનં મહત્ ।
સૂક્ષ્માત્સૂક્ષ્મતરં નિત્યં તત્ત્વમેવ ત્વમેવ તત્ ॥ ૪.૮૦॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિપ્રપઞ્ચં યત્પ્રકાશતે ।
તદ્બ્રહ્માહમિતિજ્ઞાત્વા સર્વબન્ધૈઃ પ્રમુચ્યતે ॥ ૪.૮૧॥

ત્રિષુ ધામસુ યદ્ભોજ્યં ભોક્તા ભોગશ્ચ યદ્ભવેત્ ।
તેભ્યો વિલક્ષણસ્સાક્ષી ચિન્માત્રોઽહં સદાશિવઃ ॥ ૪.૮૨॥

મય્યેવ સકલં જાતં મયિ સર્વં પ્રતિષ્ઠિતમ્ ।
મયિ સર્વં લયં યાતિ તદ્બ્રહ્માદ્વયમસ્મ્યહમ્ ॥ ૪.૮૩॥

અણોરણીયાનહમેવ તદ્વન્મહાનહં વિશ્વમિદં વિચિત્રમ્ ।
પુરાતનોઽહં પુરુષોઽહમીશો હિરણ્મયોઽહં શિવરૂપમસ્મિ ॥ ૪.૮૪॥

અપાણિપાદોઽહમચિન્ત્યશક્તિઃ પશ્યામ્યચક્ષુશ્ચ શ‍ૃણોમ્યકર્ણઃ ।
અહં વિજાનામિ વિવિક્તરૂપો ન ચાસ્તિ વેત્તા મમ ચિત્સદાઽહમ્ ॥ ૪.૮૫॥

વેદૈરનેકૈરહમેવ વેદ્યો વેદાન્તકૃદ્વેદવિદેવ ચાહમ્ ।
ન પુણ્યપાપે મમ નાસ્તિ નાશો ન જન્મદેહેન્દ્રિયબુદ્ધિરસ્તિ ॥ ૪.૮૬॥

ન ભૂમિરાપો મમ વહ્નિરસ્તિ ન ચાનિલો મેઽસ્તિ ન ચામ્બરં ચ ।
એવં વિદિત્વા પરમાર્થરૂપં ગુહાશયં નિષ્કળમદ્વિતીયમ્ ॥ ૪.૮૭॥

અખણ્ડમાદ્યન્તવિહીનમેકં તેજોમયાનન્દઘનસ્વરૂપમ્ ।
સમસ્તસાક્ષિં સદસદ્વિહીનં પ્રયાતિ શુદ્ધં પરમાર્થતત્ત્વમ્ ॥ ૪.૮૮॥

શ્રી ગુરુમૂર્તિઃ ।
એવં શ્રુત્વા નિદાઘસ્સ ઋભુવક્ત્રાદ્યદાર્થતઃ ।
બ્રહ્મૈવાહમિતિ જ્ઞાત્વા કૃતકૃત્યોઽભવદ્વિધે ॥ ૪.૮૯॥

યતસ્ત્વં ચ પરાત્માનં શ્રુતવાનસિ મન્મુખાત્ ।
ત્વં ચ ધન્યઃ પુનઃ પૃચ્છ શ્રોતવ્યાન્તરમસ્તિ ચેત્ ॥ ૪.૯૦॥

॥ ઇતિ શ્રીગુરુજ્ઞાનવાસિષ્ઠે તત્ત્વનારાયણે
જ્ઞાનકાણ્ડસ્ય પ્રથમપાદે ષષ્ઠોઽધ્યાયઃ એવં
શ્રી ઋભુગીતાખ્યોઽયં ગ્રન્થસ્સમાપ્તઃ ॥

॥ ૐ તત્સત્ ॥

From a book in Telugu Script published by
V.Ramaswami Sastrulu and Sons, Madras.

Encoded and proofread by D.V.N.Sarma
Proofread by D.V.N.Sarma and PSA Easwaran

*RibhugItA from Gurujnanavasishtha*
pdf was typeset on December 30, 2022

Please send corrections to *sanskrit@cheerful.com*